"सन्ति चाशीविषसमाः सन्ति मन्दास्तथाऽपरे। विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर!। मेकला द्रविडा लाटाः पौण्ड्राः कोन्वशिरास्तथा। शौण्डीका दरदा दार्व्वाश्चोलाः शवरवर्व्वराः। किराता यवनाश्चैव तास्ताः क्षत्त्रियजातयः। वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात्"।

**कोप** पु॰ कुप—भावे घञ्। १क्रोधे कामानाग्निजे चित्तवृत्तिभेदे अमरः। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा॰ बधाद्यनुकूलश्चित्तवृत्तिभेदः कोपः। अमर्षशब्दे विवृतिः। "पादेन प्रहरन् कोपात्" मनुः। "मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः। द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि। प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना" सा॰ द॰ उक्ते शृङ्गाररसाङ्गे २प्रणयकोपे च
"अपकारिणि चेत् कोपः कोपे कोपः कथं नहि। धर्म्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि" नीतिसा॰। "रिपौ बन्धौ स्वदेहे च समैकात्म्यं प्रपश्यतः। विवेकिनः कुतः कोपः स्वदेहावयवेष्विवेति" ३धातुवैषम्यकारिदोषाणां विकारभेदे सुश्रु॰ "तत्र एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकारहेतवः" शारीराणां विकाराणामेष वर्गश्चतुर्विधः। चये कोपे शमे चैव हेतुरुक्तश्चिकित्सने" सुश्रु॰ "स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः" सुश्रु॰

**कोपक्रम** न॰ उपक्रम्यते कर्म्मणि घञ् ६त॰ उपक्रमान्तत्वात् क्लीवता। कस्य ब्रह्मण उपक्रमे—उपक्रम्यमाणे १ब्रह्मणा आदौ ज्ञात्वा उपक्रम्यमाणायां जगतः सृष्टौ अमरः। कोपक्रमप्यत्र न॰। ६त॰। २कोपस्य क्रमे पु॰

**कोपन** त्रि॰ कुप—ताच्छील्ये युच्। कोपशीले जटाध॰"चण्डस्त्वत्यन्तकोपनः" अमरः। "आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्" भा॰आ॰२९अ॰। "तपस्वी कोपनो भृशम्" भा॰व॰११०अ॰ "पादानतः कोपनयाऽवधूतः" कुमा॰ २असुरभेदे पु॰"शरभः शलभश्चैव कुपनः कोपनः क्रथः" हरि॰ ४२अ॰ कुप—णिच्—भावे ल्युट्। ३कोपविधादने ४दोषविकारकारकव्यापारभेदे न॰ "स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्" भा॰ आश्व॰ १७अ॰। "यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः" सुश्रु॰ कुप—णिच् कर्त्तरि ल्यु। ५कोपसाधके त्रि॰ "कोपनं कफवातानां दुर्नाम्नां चाधिकं दधि" सुश्रुतः

**कोपनक** पु॰ कोपनः कोपशील इव कायति कै—क। १चोरनामकगन्धद्रव्ये राजनि॰ स्वार्थे क। २कोपने त्रि॰

**कोपनीय** त्रि॰ कुप—कर्म्मणि अनीयर्। द्वेषविषये "ते च शब्दादयउपस्थिताः परस्परेणाभिहन्यमानास्तदुपायाश्चाभिमादयः स्वरूपेणैव कोपनीया भवन्तीति" सा॰त॰ कौ॰

**कोपयिष्णु** त्रि॰ कुप—णिच् बा॰ इष्णुच्। परस्य कोपकारके "वैरायैव तदा व्यस्तं क्षत्रियान् कोपयिष्णुभिः" भा॰ आ॰ १७९अ॰

**कोपलता** स्त्री कोपहेतुर्लता। कर्णस्फोटलतायां राजनि॰

**कोपिन्** पुंस्त्री॰ अवशं कुप्यति णिनि। १जलपारावते २अवशकोपशालिनि त्रि॰ राजनि॰ स्त्रियां ङीप्। कोपयति णिजन्तात् णिनि। ३कोपसम्पादके त्रि॰ "सिद्धार्थकः शोणितपित्तकोपी" सुश्रुतः स्त्रियां ङीप्।

**कोमल** न॰ कु—कलच् मुट् च नि॰ गुणः। १जले। २मृदौ, अकठिने, च त्रि॰ मेदि॰ ३क्षीरिकायां स्त्री॰ टाप् शब्दच॰। ४मनोहरे त्रि॰ शब्दर॰। "निशा च शय्या च शशाङ्ककोमला" नैष॰। शशस्याङ्कवन्मृदुला शय्या। शशाङ्केन मनोहरा निशा च इत्यर्थः। "अन्तस्तुतः कोमलरत्नराशीन्" माघः।

**कोमलक** त्रि॰ स्वार्थे क। १कोमलशब्दार्थे। संज्ञायां क। २मृणाले शब्दच॰।

**कोमलवल्कली** स्त्री कोमलं वल्कलं यस्याः। लवलीलतायां (नोयाड़) शब्दचिन्ता॰।

**कोमलासन** न॰ आसनशब्ददर्शितमृगादिचर्म्मनिर्म्मिते आसनभेदे"इदानीं शृणु देवेश! रहस्यं कोमलासनम्। योगसिद्धिप्रचाराय सिद्धौ चर्म्मासनं तु तत्" रुद्रया॰।

**कोमासिका** स्त्री ईषदुमेव अतसीवृक्ष इव आस्ते आस—ण्वुल् टाप् अतइत्त्वम्। जालिकायाम् (फलेर जालि) हारावली।

**कोम्य** त्रि॰ कम—कर्म्मणि ण्यत् पृषो॰। काम्ये। "जुष्टौ नः सन्तु कोम्या" ऋ॰ १।१७१।३। "कोम्या काम्यानि" भा॰

**कोयष्टि** पु॰ कं जलं यष्टिरिवास्य पृषो॰ अत ओत्त्वम्। जलकुक्कुभे पक्षिणि। "प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्"। मनुः संज्ञायां कन् कोयष्टिक (टिटिर) टिट्टिभपक्षिणि "कपोतपारावतभृङ्गराजपरभृतेत्यादि प्रतुदपक्षिगणे कोयष्टिकमुक्त्वा "कषाया मधुरारूक्षाः फलाहाराः मरुत्कराः। पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः" सुश्रुते तन्मांसगुणा उक्ताः।